# 2023

## SANSKRIT

Paper : SKT–HC–2016

**[ Classical Sanskrit Literature (Prose) ]**

( Honours Core )

*Full Marks* : 80

*Time* : 3 hours

*The figures in the margin indicate full marks for the questions*

## UNIT—I

**( Śukanāsopadeśa )**

( *Marks* : 25 )

**1.** Answer the following questions : 1×5=5

अधोलिखितानां प्रश्नानामुत्तरं देयम्—

*(a)* Who is the heroine of the *Kādambarī*?

'कादम्बरी' इति काव्ये नायिका का?

*(b)* Under which king Śukanāsa was a minister?

शुकनासः कस्य राज्ञः मन्त्री आसीत्?

*(c)* When did Śukanāsa advise?

कस्मिन् क्षणे शुकनासः उपदेशं दत्तवान्?

*(d)* "पातालगुहेव तमोबहुला"

Who is referred to as 'तमोबहुला' here?

अत्र 'तमोबहुला' इत्यनेन का निर्दिश्यते?

*(e)* How could Bhīma win the heart of Hiḍimbā?

भीमेन कथं हिडिम्बायाः हृदयं जितम्?

**2.** Translate any *one* of the following : 5

निम्नलिखितयोः **एकस्य** अनुवादः करणीयः—

*(a)* आलोकयतु तावत् कल्याणाभिनिवेशो लक्ष्मीमेव प्रथमम्। इयं हि सुभटखड्गमण्डलोत्पल-वन-विभ्रम-भ्रमरी लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैःश्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिराया मदम्, कौस्तुभमणेरतिनैष्ठुर्य्यम्, इत्येतानि सहवास-परिचयवशाद्-विरह-विनोद-चिह्नानि गृहीत्वेवोद्गता।

*(b)* एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीताः विक्लवा भवन्ति राजानः, सर्वाविनयाधिष्ठानताञ्च गच्छन्ति। तथाहि, अभिषेकसमय एव चैषां मङ्गलकलसजलैरिव प्रक्षाल्यते दाक्षिण्यम्, अग्निकार्य्य-धूमेनेव मलिनीक्रियते हृदयम्, पुरोहित-कुशाग्र-सम्मार्जनीभिरिवापनीयते क्षान्तिः...।

**3.** Explain : 10

व्याख्यायताम्—

"गद्यं कवीनां निकषं वदन्ति।"

*Or/ अथवा*

Assess the *Kādambarī* as a Kathā type of Kāvya.

'कादम्बरी' इति काव्यं कथा न वा, निर्णियताम्।





**4.** Bring out the implication of any *one* of the following : 5

निम्नलिखितस्य **एकतरस्य** अर्थः स्पष्टीकरणीयः—

*(a)* तोयराशिसम्भवापि तृष्णां संवर्धयति।

*(b)* पुरुषोत्तमरतापि खलजनप्रिया।

## UNIT—II

### (Viśrutacaritam )

*( Marks : 25 )*

**5.** Write a note on the style of Daṇḍin. 10

दण्डिनः रचनाशैलीविषयकं निबन्धनं लिख्यताम्।

*Or/ अथवा*

Who was पुण्यवर्मा? Describe him following your text.

को नु पुण्यवर्मा? पाठ्यमनुसृत्य तस्य वर्णनमुपस्थापय।

**6.** Translate any *one* of the following : 5

निम्नलिखितयोः **एकस्य** अनुवादः करणीयः—

*(a)* अथाहमभ्येत्य व्रतत्या कयाऽपि वृद्धमुत्तार्य तं च बालं वंशनालीमुखोद्घृताभिरद्भिः फलैश्च पश्चषैः शरक्षेपोच्छ्रितस्य लकुचवृक्षस्य शिखरात्पाषाणपतितैः प्रत्यानीतप्राणवृत्तिमापाद्य तरुतलनिषण्णस्तं जरन्तमब्रवम्—तात, क एषः बाल? को वा भवान्? कथं चेयमापदापन्ना इति।

*(b)* दिव्यं हि चक्षुर्भूत-भवद् भविष्यत्सु व्यवहित-विप्रकृष्टादिषु च विषयेषु शास्त्रं नामाप्रतिहतवृत्ति। तेन हीनः सतोरप्यायतविशालयोलोचनयोरन्ध एव जन्तुरर्थदर्शनेष्व-सामर्थ्यात्। अतो विहाय बाह्यविद्यास्वभिषङ्गमागमय दण्डनीतिं कुलविद्यां तदर्थानुष्ठानेन चावर्जितशक्तिसिद्धिरस्खलितशासनः शाधि चिरमुदधि-मेखलामुर्वीम्।

7. Answer the following questions : 2×5=10

अधोलिखितानां प्रश्नानामुत्तरं देयम्—

*(a)* Who was Vasurakṣita? Write about him in few words.

वसुरक्षितः कः? संक्षिप्ततया परिचयं ददातु।

*(b)* Who was the son of Puṇyavarmā? How was he as a ruler?

को नु पुण्यवर्मणः पुत्रः? प्रजापालने सः कीदृशः आसीत्?

*(c)* What is meant by 'पुरुषायुषम्'? Write in few words.

'पुरुषायुषम्' इत्यस्य कोऽर्थः? संक्षिप्तटिप्पणी देया।

*(d)* Derive the following words (any *two*) :

निम्नलिखितशब्दानां व्युत्पत्तिः लेखनीया (द्वयोः)—

क्लिश्यन्; अगदत्; पिपासाम्; आपन्ना; अनुष्ठानम्।





*(e)* Name and expound the Samāsas of any *two* of the following :

निम्नलिखितसमासानां नामोल्लेखपूर्वकं व्याख्या कार्या (द्वयोः)—

तरुतलनिषण्णः; पाषाणपतितैः; अदत्तकर्णः; उत्थानशीलः; शास्त्रप्रमाणकः।

## UNIT—III

**(Origin and Development of Prose, Important Prose Romances and Fables )**

( *Marks* : 30 )

8. Answer the following questions : 1×5=5

निम्नलिखितानां प्रश्नानाम् उत्तरं देयम्—

*(a)* Name the prose romance written by Subandhu.

सुबन्धुरचितस्य गद्यकाव्यस्य नाम देयम्।

*(b)* Who is the author of the *Puruṣaparīkṣā*?

'पुरुषपरीक्षा' इति ग्रन्थस्य प्रणेता कः?

*(c)* *Harṣacarita* is a Kathā type of prose romance.

( Write True or False )

'हर्षचरितम्' एका कथा।

( शुद्धम् अशुद्धं वा लिखत )

(d) Who is the author of the *Siṁhāsana-dvātriṁśikā*?

'सिंहासनद्वात्रिंशिका'-ग्रन्थस्य प्रणेता कः?

(e) In which century Bāṇabhaṭṭa flourished?

को नु बाणभट्टस्य समयः?

**9.** Answer any *two* of the following : 10×2=20

अधोलिखितानां कस्यापि द्वयस्य उत्तरं देयम्—

(a) Write a note on *Pañcatantra*.

पञ्चतन्त्रमलम्ब्य टिप्पणी देया।

(b) Write on the origin and growth of Sanskrit prose literature.

संस्कृतगद्यकाव्यस्य उत्पत्तिं तथा क्रमविकाशमवलम्ब्य आलोचनं कार्यम्।

(c) Write down the salient features of the *Vāsavadattā*.

'वासवदत्ता' इति ग्रन्थस्य वैशिष्ट्यानि लिखत।





(d) Discuss about the life and works of Daṇḍin.

दण्डिनः जीवनविषयकं तथा कर्मविषयकं टिप्पणी देया।

**10.** Write a short note on any *one* of the following : 5

कस्यापि एकस्य टीका लेखनीया—

तिलकमञ्जरी ; शुकसप्ततिः।

★★★